योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ७५

पञ्चसप्ततितमः सर्गः ७५

श्रीवसिष्ठ उवाच ।

जनकः संस्थितो राज्ये व्यवहारपरोऽपि सन् ।

विगतज्वर एवान्तरनाकुलमतिः सदा ।। १

पितामहो दिलीपस्ते सर्वारम्भपरोऽप्यलम् ।

वीतरागतयैवान्तर्बुभुजे मेदिनीं चिरम् ।। २

निरञ्जनतया बुद्धो जनतां पालयंश्चिरम् ।

जीवन्मुक्ताकृतिर्नित्यं मनू राज्यमपालयत् ।। ३

विचित्रबलयुद्धेषु व्यवहारेषु भूरिषु ।

मान्धाता सुचिरं तिष्ठन्प्राप्तवान्वै परं पदम् ।। ४

बलिः पातालपीठस्थः कुर्वन्सदिव संस्थितिम् ।

सदा त्यागी सदाऽसक्तो जीवन्मुक्त इति स्थितः ।। ५

नमुचिर्दानवाधीशो देवद्वन्द्वपरः सदा ।

नानाचारविचारेषु क्वचिन्नान्तरतप्यत ।। ६

वासवाजौ तनुत्यागी वृत्रो विततमानसः ।

अन्तःशान्तमना मानी चकार सुरसंगरम् ।। ७

कुर्वन्दानवकार्याणि पातालतलपालकः ।

अनपायं निराक्रोशं प्रह्लादो ह्लादमागतः ।। ८

शम्बरैकपरोऽप्यन्तःशम्बरैकतयोदितः ।

संसारशम्बरं राम शम्बरस्त्यक्तवानिदम् ।। ९

असक्तबुद्धिर्हरिणा कुर्वन्दानवसंगरम् ।

परां संविदमासाद्य कुशलस्त्यक्तवानिदम् ।। १०

सर्वामरमुखो वह्नि क्रियाजालपरो ह्यपि ।
यज्ञलक्ष्मीश्चिरं भुंक्ते मुक्त एवेह तिष्ठति ।। ११
पीयमानः सुरैः सर्वैः सोमः समरसाशयः ।
क्वचिदेति न संसङ्गमाक्रान्तावम्बरं यथा ।। १७
बृहस्पतिर्देवगुरुर्दारार्थं चन्द्रयोध्यपि ।.
आचरन्दिवि चित्रेहां मुक्त एव ह्यवस्थितः ।। १३
शुक्रोऽम्बरतलद्योती बुधः सर्वार्थपालकः ।
निर्विकारमतिः कालं नयत्यसुरदेशिकः ।। १४
जगद्भूतगणाङ्गानि चिरं संचारयन्नपि ।
सर्वदा सर्वसंचारी मुक्त एव समीरणः ।। १५
लोकाजवं जवीभावप्रोद्वेगज्ञोऽप्यखिन्नधीः ।
ब्रह्मा सममना राम क्षिपयत्यायुराततम् ।। १६
जरामरणयुद्धादिद्वत्द्वसंगरलीलया ।
चरती ह चिरं कालं मुक्तोऽपि भगवान्हरिः ।। १७
मुक्तेनापि त्रिनेत्रेण सौन्दर्यतरुमञ्जरी ।
देहार्धे धार्यते गौरी कामुकेनेव कामिनी ।। १८
मुक्तयापि गले बद्धो गौर्या गौरस्त्रिलोचनः ।
संशुद्ध इव मुक्तानां हारः शशिकलामलः ।। १९
गुहो गहनधीर्वीरस्तारकादिरणक्रियाम् ।
मुक्तोऽपि कृतवान्सर्वं ज्ञानरत्नैकसागरः ।। २०
भृङ्गीशो रक्तमांसं स्वं स्वमात्रे प्रवितीर्णवान् ।
मुक्तयैव धिया राम धीरया ध्यानधौतया ।। २१
मुनिर्मुक्तस्वभावोऽपि जगज्जङ्गलखण्डकम् ।
नारदो विजहारेमं शीतया कार्यशीलया ।। २२
जीवन्मुक्तमना मान्यो विश्वामित्रोऽप्ययं प्रभुः ।
वेदोक्तां मखनिर्माणक्रियां समधितिष्ठति ।। २३

धारयत्यवनीं शेषः करोत्यर्को दिनावलीम् ।

यमो यमत्वं कुरुते जीवन्मुक्ततयैव हि ।। २४

अन्येऽप्यस्मिंस्त्रिभुवने यक्षासुरनराः सुराः ।

शतशो मुक्ततां याताः सन्तस्तिष्ठन्तिसंसृतौ ।। २५

संस्थिता व्यवहारेषु विचित्राचारधारिषु ।

अन्तराशीतलाः केचित्केचिन्मूढाः शिलासमाः ।। २६

परमं बोधमासाद्य केचित्काननमागताः ।

यथा भृगुभरद्वाजविश्वामित्रशुकादयः ।। २७

केचिद्राज्येषु तिष्ठन्ति च्छत्रचामरपालिताः ।

यथा जनकशर्यातिमान्धातृसगरादयः ।। २८

केचिद्व्योमनि तिष्ठन्ति धिष्ण्यचक्रान्तरस्थिताः ।

यथा बृहस्पत्युशनश्चन्द्रसूर्यमुनीश्वराः ।। २९

केचित्सुरपदे याता विमानावलिमास्थिताः ।

यथाग्निवायुवरुणयमतुम्बुरुनारदाः ।। ३०

केचितपातालकुहरे जीवन्मुक्ता व्यवस्थिताः।

यथा बलिसुहोत्रान्धप्रह्लादाह्लादपूर्वकाः ।। ३१

तिर्यग्योनिष्वपि सदा विद्यन्ते कृतबुद्धयः ।

देवयोनिष्वपि प्राज्ञा विद्यन्ते मूर्खबुद्धयः ।। ३२

सर्वं सर्वेण सर्वत्र सर्वथा सर्वदैव हि ।

संभवत्येव सर्वात्मन्यात्मन्याततरूपिणि ।। ३३

विधेर्विचित्रा नियतिरनन्तारम्भमन्थरा ।

संनिवेशांशवैचित्र्यात्सर्वं सर्वत्र दृश्यते ।। ३४

विधिर्दैवं विधिर्धाता सर्वेशः शिव ईश्वरः ।

इति नामभिरात्मा नः प्रत्यक्चेतन उच्यते ।। ३५

अस्त्यवस्तुनि वस्त्वन्तः काञ्चनं सिकतास्विव ।

अस्ति वस्तुन्यवस्त्वन्तर्मलं हेमकणेष्विव ।। ३६

अयुक्ते युक्तता युक्त्या प्रेक्ष्यमाणा प्रदृश्यते ।
पापस्य हि भयाल्लोको राम धर्मे प्रवर्तते ।। ३७
असत्ये सत्यता साधो शाश्वती परिलक्ष्यते ।
शून्येन ध्यानयोगेन शाश्वतं पदमाप्यते ।। ३८
यन्नास्ति तदुदेत्याशु देशकालविलासतः ।
शशकाः श्रृङ्गवन्तो हि दृश्यन्ते शम्बरस्थितौ ।। ३९
ये वज्रसाराः सुदृढा दृश्यन्ते ते क्षयं गताः ।
कल्पस्यान्ते यथेन्द्वर्कधराब्धिविबुधादयः ।। ४०
इति पश्यन्महाबाहो भावाभावभवक्रमम् ।
हर्षामर्षविषादेहाः संत्यज्य समतां व्रज ।। ४१
असत्सदेव भातीह सदसच्चापि दृश्यते ।
आस्थानास्थे परित्यज्य तेनाशु समतां व्रज ।। ४२
मुक्तौ राघव लोकेऽस्मिन्न प्राप्तिः संभवत्यलम् ।
अप्रवृत्तौ विवेकस्य मग्ना हि जनकोटयः ।। ४३
मुक्तौ राघव लोकेऽस्मिन्प्राप्तिरस्ति सदैव हि ।
प्रवृत्त्या हि विवेकस्य विमुक्ता भूतकोटयः ।। ४४
प्रविवेकाविवेकाभ्यां सुलभालभ्यतां गता ।
मुक्तिर्मनःक्षयप्राप्त्या विवेकं तेन दीपय ।। ४५
आत्मावलोकने यत्नः कर्तव्यो भूतिमिच्छता ।
सर्वदुःखशिरश्छेद आत्मालोकेन जायते ।। ४६
नीरागा निरुपासङ्गा जीवन्मुक्ता महाधियः ।
संभवन्तीह बहुशः सुहोत्रजनका इव ।। ४७
तस्मात्त्वमपि वैराग्यविवेकोदितधीरधीः ।
जीवन्मुक्तो विहर भो समलोष्टाश्मकाञ्चनः ।। ४८
द्विविधा मुक्तता लोके विद्यते देहधारिणाम् ।
सदेहैका विदेहान्या विभागोऽयं तयोः श्रृणु ।। ४९

असंसङ्गात्पदार्थानां मनःशान्तिर्विमुक्तता ।

सत्यसत्यपि देहे सा संभवत्यनघाकृते ।। ५०

स्नेहसंक्षयमेवाङ्ग विदुः कैवल्यमुत्तमम् ।

तत्संभवति देहस्य भावे चाभाव एव च ।। ५१

यो जीवति गतस्नेहः स जीवन्मुक्त उच्यते ।

सस्नेहजीवितो बद्धो मुक्त एव तृतीयकः ।। ५२

यत्नो यत्नेन कर्तव्यो मोक्षार्थं युक्तिपूर्वकम् ।

यत्नयुक्तिविहीनस्य गोष्पदं दुस्तरं भवेत् ।। ५३

न त्वनध्यवसायस्य दुःखाय विपुलात्मने ।

आत्मा परवशः कार्यो मोहमाश्रित्य केवलम् ।। ५४

सुमहद्धैर्यमालम्ब्य मनसा व्यवसायिना ।

विचारयात्मनात्मानमात्मनश्चिरसिद्धये ।

वितताध्यवसायस्य जगद्भवतिगोष्पदम् ।। ५५

यदुपगतः सुगतः पदं प्रधानं

यदपगतोऽध्रुवतां नृपश्च कश्चित् ।

यदुपगताः पदमुत्तमं महान्तः

प्रयतनकल्पतरोर्महाफलं तत् ।। ५६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे मुक्तामुक्तविचारो नाम पञ्चसप्ततितमः सर्गः ।। ७५ ।।